पुष्टं, त्रि, (पुष+क्तः।) कृतपोषणम्। तत्पर्य्यायः। पुषितम् २। इत्यमरः। ३।१।६७॥ पतम् ३। इति जटाधरः॥ (यथा, मनुः। ७।१७१।
"यदा मन्येत भावेन हृष्टं पुष्टं बलं स्वकम्।
परस्य विपरीतञ्च तदा यायाद्रिपुं प्रति॥")

पुष्टिः, स्त्री, (पुष+भावे क्तिन्।) पोषणम्। वृद्धिः। इति मेदिनी। टे, २३॥ (यथा, मार्कण्डेये। २२।११।
"वैदिकैर्वारणैर्मन्त्रैः प्रजानां पुष्टिहेतुकैः॥")
अश्वगन्धा। इति राजनिर्घण्टः॥ षोड़शमातृकान्तर्गतदेवताविशेषः। इति श्राद्धतत्त्वम्॥ (सा तु दक्षकन्यानामन्यतमा। यथा, मार्कण्डेये।
"प्रसूत्याञ्च तथा दक्षश्चतस्रो विंशतिस्तथा।
ससर्ज्ज कन्यास्तासाञ्च सम्यङ्नामानि मे शृणु॥
श्रद्धा लक्ष्मीर्धृतिस्तुष्टिः पुष्टिर्मेधा क्रिया तथा॥")
गणपतेः पत्नी। यथा, ब्रह्मवैवर्त्तपुराणे। २।१।६६।
"पुष्टिर्गणपतेः पत्नी पूजिता जगतीतले।
यया विना परिक्षीणाः पुमांसो योषितोऽपि च॥"
खड्गविशेषः। यथाह भोजः।
"मङ्गला विजया पुष्टिः क्षमा तुष्टिः सुखासनम्।
प्रचण्डा सर्व्वतोभद्रा खड्गानामाष्टकं विदुः॥"
तन्त्रोक्तचन्द्रकलाया नामान्तरम्। यथा, रुद्रयामले।
"अमृता मानदा पूषा पुष्टिस्तुष्टी रतिर्धृतिः।
शशिनी चन्द्रिका कान्तिर्ज्योत्स्ना श्रीः प्रीतिरङ्गदा।
पूर्णापूर्णामृताकामदायिन्यः शशिनः कलाः॥")

पुष्टिका, स्त्री, (पुष्ट्यै कं जलं यस्याः।) जलशुक्तिः। इति राजनिर्घण्टः॥

पुष्टिकान्तः, पुं, (पुष्टेः कान्तः।) गणेशः। इति शब्दरत्नावली॥

पुष्टिदा, स्त्री, (पुष्टिं ददातीति। दा+कः।) अश्वगन्धा। वृद्धिः। इति राजनिर्घण्टः॥ पुष्टिदात्री च॥

पुष्प, य फुल्लने। इति कविकल्पद्रुमः॥ (दिवा०-पर०-अक०-सेट्।) पञ्चमस्वरी। मद्धेऽप्युपधः। फुल्लनं विकसनम्। य, पुष्प्यति कुन्दकोरकम्। इति दुर्गादासः॥

पुष्पं, क्ली, पुष्प्यति विकसति यः। (पुष्प फुल्लने+अच्।) तरुलतादीनां प्रसवः। फुल इति भाषा। तत्पर्य्यायः। प्रसूनम् २। कुसुमम् ३ सुमनसः ४। इत्यमरः। २।४।१७॥ सूनम् ५ प्रसवः ६ सुमनः ७। इति शब्दरत्नावली॥
स्वहस्तपुष्पचयनफलं यथा,—
"उपहार्य्याणि पुष्पाणि मम कर्म्मपरायणः।
यो मामुपानयेद्भूमे मम कर्म्मपथे स्थितः॥
पुष्पाणि तत्र यावन्ति मम मूर्द्धनि धारयेत्।
स लब्ध्वा पुष्कलं कर्म्म मम लोकाय गच्छति॥"
अकर्म्मण्यपुष्पदाने दोषो यथा,—

वराह उवाच।
"अकर्म्मण्येन पुष्पेण यो मामर्च्चयते भुवि।
पातनं तस्य वक्ष्यामि तच्छृणु त्वं वसुन्धरे!॥
नाहं तत् प्रतिगृह्णामि न च ते वै मम प्रियाः।
मूर्खैर्भागवतैर्दत्तं मम विप्रियकारिणः॥
पतन्ति नरके घोरे रौरवे तदनन्तरम्।
अज्ञातस्य च दोषेण दुःखान्यनुभवन्ति च॥
वानरो दश वर्षाणि मार्जारश्च त्रयोदश।
मूषकः पञ्च वर्षाणि बलीवर्द्दश्च द्वादश॥
छागश्चैवाष्ट वर्षाणि मासं वै ग्रामकुक्कुटः।
त्रीणि वर्षाणि महिषो भवत्येव न संशयः॥
एतत्ते कथितं भद्रे! पुष्पं यस्मै न रोचते।
अकर्म्मण्यं विशालाक्षि! पुष्पं ये न ददन्ति वै॥"
इति वराहपुराणम्॥ * ॥

देवीप्रियपुष्पाणि यथा,—
"पुष्पाणि देव्या वैष्णव्याः प्रियाणि शृणु संप्रति।
बकुलैश्चैव मन्दारैः कुन्दपुष्पकुरुण्टकैः॥
करवीरार्कपुष्पैश्च शाल्मलैश्चापराजितैः।
दमनैः सिन्धुवारैश्च सुरभीमरुवकैस्तथा॥
लताभिर्म्मत्स्यचैश्च दूर्व्वाङ्कुरैश्च कोमलैः।
मञ्जरीभिः कुशानाञ्च बिल्वपत्रैः सुशोभनैः॥
पूजयेद्वैष्णवीं देवीं कामाख्यां त्रिपुरां तथा।
अन्याश्च याः शिवाप्रीत्यै जायन्ते पुष्पजातयः॥
ता इमाः शृणु कीर्त्त्यन्ते मया वेतालभैरव!।
मालती मल्लिका जाती यूथिका माधवीलता॥
पाटला करवीरञ्च जवा तर्कारिका तथा।
कुब्जकं तगरश्चैव कर्णिकारोऽथ रोचनः॥
चम्पकाम्रातकौ बाणो बर्व्वरा मल्लिका तथा।
अशोको लोध्रतिलकौ अटरूषशिरीषकौ॥
शमीपुष्पञ्च द्रोणञ्च पद्मोत्पलवकारुणाः।
श्वेतारुणे त्रिसन्ध्ये च पलाशः खदिरस्तथा॥
वनमाला च सेवन्ती कुसुदोऽथ कदम्बकः।
चक्रं कोकनदश्चैव भण्डिलो गिरिकर्णिका॥
नागकेशरपुन्नागौ केतकबञ्जुलिका तथा।
दोहदा बीजपूरञ्च नमेरुः शालमेव च॥
त्रपुषी चण्डविन्धश्च झिण्टी पञ्चविधा तथा।
एवमाद्युक्तकुसुमैः पूजयेत् वरदां शिवाम्॥"*॥

वर्ज्जनीयपुष्पं यथा,—
"पुष्पञ्च कृमिसम्भिन्नं विशीर्णं भग्नसुन्नतम्।
सकेशं मूषिकाधूतं यत्नेन परिवर्ज्जयेत्॥
याचितं परकीयञ्च तथा पर्य्युषितञ्च यत्।
अन्त्यस्पृष्टं पदास्पृष्टं यत्नेन परिवर्ज्जयेत्॥"
इति कालिकापुराणे। ६८। ५४। अध्यायौ॥

केशवपूजने प्रशस्तपुष्पाणि यथा,—
"मालती मल्लिका चैव यूथिका चातिमुक्तकः।
पाटला करवीरञ्च जया सेवतिरेव च॥
कुब्जकस्तगरश्चैव कर्णिकारः कुरुण्टकः।
चम्पकस्तगरः कुन्दो बाणा बर्व्वरमल्लिका॥
अशोकस्तिलकश्चम्पस्तथा चैवाटरूषकः।
अमी पुष्पप्रकारास्तु शस्ताः केशवपूजने॥
केतकीपत्रपुष्पञ्च पुष्पं भृङ्गारकस्य च।
तुलस्यामलकौ चैव सद्यस्तुष्टिकरं हरेः॥
पद्मान्यम्बुसमुत्थानि रक्तनीले तथोत्पले।
सितोत्पलञ्च कृष्णस्य दयितानि सदा नृप!।
तानि पुष्पाणि देयानि विष्णवे प्रभविष्णवे॥"
इत्यग्निपुराणम्॥ * ॥

अपि च।
"जाती शताह्वा सुमना कुन्दं बहुपुटं तथा।
बाणञ्च पङ्कजाशोकं करवीरञ्च यूथिका॥
पारिभद्रं पाटला च बकुलं गिरिशालिनी।
तिलकं वनजञ्चैव पीतकं तगरन्त्वपि॥
एतानि हि प्रशस्तानि कुसुमान्यच्युतार्च्चने।
सुरभीणि तथान्यानि वर्ज्जयित्वा तु केतकीम्॥
येषामपि हि पुष्पाणि प्रशस्तान्यच्युतार्च्चने।
पल्लवान्यपि तेषां स्युः प्रशस्तानि महासुर!॥
वीरुधानां प्रधानेन बर्हिषाञ्चार्च्चयेत्तथा।
नानारूपैश्चाम्बुभवैः कमलेन्दीवरादिभिः॥
प्रवालैः शुचिभिः शुद्धैर्जलप्रक्षालितैर्बले!।
वनस्पतीनामर्च्चेत तथा दूर्व्वाग्रपल्लवैः॥"
इति वामने ६१ अध्यायः॥ * ॥

विष्णौ पुष्पविशेषदानस्य फलं यथा,—
"आरामप्रभवैः पुष्पैरच्छिद्रैः कीटवर्जितैः।
तथाप्यर्च्चयितुर्महत् कार्त्तिके विष्णुमर्च्चयेत्॥
वर्णानां हि यथा विप्रस्तीर्थानां जाह्नवी यथा।
देवानाञ्च यथा विष्णुः पुष्पाणां मालती तथा॥
मालतीमालया देवं योऽर्च्चयेद्गरुड़ध्वजम्।
जन्मदुःखजरारोगैः कर्म्मभिर्मुक्तिमाप्नुयात्॥
मालतीमालया येन पूजितः कार्त्तिके हरिः।
पापलक्षायुतं तस्य वत्स! शौरिः प्रमार्ज्जति॥
मालतीपुष्पमालाभिः कार्त्तिके पुष्पमण्डपम्।
विष्णोर्गृहे कृतं यैस्तु ते यान्ति परमां गतिम्॥
जातिपुष्पैर्विरचितां मालां यः संप्रयच्छति।
विष्णवे विधिवद्भक्त्या तस्य पुण्यफलं शृणु॥
कल्पकोटिसहस्राणि कल्पकोटिशतानि च।
वसेद्विष्णुपुरे श्रीमान् विष्णुतुल्यपराक्रमः॥
यः स्वर्णकेतकीपुष्पैः पूजयेद्गरुड़ध्वजम्।
अब्दकोटिशतं यावत्तुष्टः स्यात्तस्य वै हरिः॥
दामोदरं पूजयेद्यः कुसुमैः केतकोद्भवैः।
स वसेद्विष्णुनिलये देवेन सह मोदते॥
मल्लिकाकुसुमैर्देवं योऽर्च्चयेत्त्रिदशेश्वरम्।
कार्त्तिके परया भक्त्या दहेत् पापं त्रिधार्जितम्॥
सुगन्धैर्मल्लिकापुष्पैरच्युतं योऽर्च्चयेन्मुने!।
स सर्व्वपापनिर्मुक्तो विष्णुलोके महीयते॥
वैदधर्म्मेण केनाथ संप्राप्ते मधुमाधवे।
योऽर्च्चयेत् स मुनिश्रेष्ठ! लभते वैष्णवं पदम्॥
यः पुनः पाटलापुष्पैरर्च्चयेद्गरुड़ध्वजम्।
सुपुण्यात्मा परं स्थानं स प्रयाति हरेर्मुने!॥
अगस्त्यपुष्पैर्देवेशं येऽर्च्चयन्ति जनार्द्दनम्।
देवर्षे! दर्शनात्तेषां नरकाग्निः प्रशाम्यति॥
न तत् करोति विप्रेन्द्र! तपसा तोषितो हरिः।
यत् करोति हृषीकेशो मुनिपुष्पैरलङ्कृतः॥
विहाय सर्व्वपुष्पाणि मुनिपुष्पेण केशवम्।
कार्त्तिके योऽर्च्चयेद्भक्त्या वाजिमेधफलं लभेत्॥
मुनिपुष्पकृतां मालां ये यच्छन्ति जनार्द्दने।